# Agastyakrita Parashuramastutih

# अगस्त्यकृता परशुरामस्तुतिः

## Document Information

Text title : Agastyakrita Parashuramastutih

File name : agastyakRRitAparashurAmastutiH.itx

Category : vishhnu, dashAvatAra, vishnu

Location : doc_vishhnu

Author : Agastya

Transliterated by : Sudeep Dalbanjan

Proofread by : Sudeep Dalbanjan

Description/comments : bhArgavatantra | adhyAya 1 | 23-40||

Latest update : August 21, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 21, 2024

*sanskritdocuments.org*

# अगस्त्यकृता परशुरामस्तुतिः

अगस्त्य उवाच ।
जामदग्न्यं तनालोक्य रामं सर्वाङ्गसुन्दरम् ।
मुदा परमयोपेतः शिरसा समवन्दिषम् ॥ १॥

कृत्तो वनस्पतिरिव पातितो धरणीतले ।
विग्रहो मे मुनिश्रेष्ठाः रामस्य पवपद्मयोः ॥ २॥

अनुज्ञातः समुत्याय तोषयामास तं प्रभुम् ।
उच्चैः स्वरं समासाद्य पुण्डरीकाक्षविद्यया ॥ ३॥

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥ ४॥

नमस्ते वासुदेवाय शान्तानन्दचिदात्मने ।
अजिताय नमस्तुभ्यं षाड्गुण्यनिधमे नमः ॥ ५॥

महाविभूतिसंस्थाय नमस्ते पुरुषोत्तम ।
सहस्रशिरसे तुभ्यं सहस्रचरणाय ते ॥ ६॥

सहस्रबाहवे तुभ्यं सहस्रनयनाय ते ।
अमूर्ताय नमस्तुभ्यमेकमूर्ताय ते नमः ॥ ७॥

अनेकमूर्तये तुभ्यमक्षराय च ते नमः ।
व्यापिने वेदवेद्याय नमस्ते परमात्मने ॥ ८॥

चिन्मात्ररूपिणे तुभ्यं नमस्त्रैयन्तमूर्तये ।
अणिष्ठाय स्थविष्ठाय महिष्ठाय च ते नमः ॥ ९॥

नेदिष्ठाय दविष्ठाय क्षेपिष्ठाय च ते नमः ।
वरिष्ठाय वसिष्ठाय कनिष्ठाय च ते नमः ॥ १०॥

पञ्चात्मने नमस्तुभयं सर्वान्तर्यामिणे नमः ।

कल्पनाक्रोसडरूपाय सृष्टिस्थित्यन्तहेतवे ॥ ११॥

नमस्ते गुणरूपाय गुणरूपानुवर्तिने
व्यस्ताय च समस्ताय समस्तव्यस्तरूपिणे ॥ १२॥

आदिमध्यान्तशून्याय यद्वते च नमो नमः ।
प्रणवप्रतिपाद्याय नमः प्रणवरूपिणे ॥ १३॥

लोकयात्राप्रसिद्ध्यर्थं स्रष्टृब्रह्मादिरूपिणे ।
नमस्तुभ्यं नृसिंहादिमुर्तिमेदाय विष्णवे ॥ १४॥

विपाकैः कर्मणां क्लेशैरस्पृष्टवपुवे नमः ।
नमो ब्रह्मण्यदेवाय तेजसां निधये नमः ॥ १५॥

नित्यासाधारणानेकलोकरक्षापरिच्छदे ।
सच्चिदानन्दरूपाय वरेण्याय नमो नमः ॥ १६॥

यजमानाय यज्ञाय यष्टव्याय नमो नमः ।
इज्याफलात्मने तुभ्यं नमः स्वाध्यायशालिने ॥ १७॥

नमः परमहंसाय नमः सर्वगुणाय ते ।
स्थिताय परमे व्योम्नि भूयो भूयो नमो नमः ॥ १८॥

इति भार्गवतन्त्रान्तर्गता अगस्त्यकृता परशुरामस्तुतिः समाप्ता ।

भार्गवतन्त्र । अध्याय १ । २३-४०॥

bhArgavatantra . adhyAya 1 . 23-40..

Encoded and proofread by Sudeep Dalbanjan

*Agastyakrita Parashuramastutih*

pdf was typeset on August 21, 2024

Please send corrections to *sanskrit@cheerful.com*